# नीलमाधवः

शुभजित्दासः

आसीत् उज्जयिन्यां प्रजावत्सलः धर्मगतप्राणः भक्तप्रवरः इन्द्रद्युम्ननामकः नृपतिः। एकदा भगवतः नीलमाधवस्य दर्शनमात्रेणैव संसारसागरात् मुक्तिर्भवति इति कस्माच्चित् धर्मात्ममुखात् श्रुतः राजा तदनुग्रहवशाच्च भगवद्दर्शनाय वरं लब्धवान्। परन्तु भगवान् नीलमाधवः कस्मिन् प्रदेशे विराजते इति राज्ञा अविदितम् आसीत्। अतः भगवत्-अनुसन्धानम् आरब्धम्। अनुसन्धानाय मुख्यरूपेण राजपुरोहितः विद्यापतिः नियुक्तः आसीत्। केचन धूर्तसभासदः पुरस्कारलोभेन विद्यापतेः गमनात् प्रागेव अनुसन्धानाय प्रस्थिताः। विद्यापतिः महान् भगवद्भक्तः, अतः सः राज्ञः अतिप्रियः विश्वास-भाजनम् आसीत्। स तु एकस्मिन् शुभे दिने भगवन्तं सम्पूज्य राजाज्ञानुसारेण तदनुसन्धानाय प्रस्थितः। एवं वत्सराणि व्यतीतानि, सर्वे विफलमनोरथाः सभासदः राजभवनं प्रत्यवर्तन्त। परन्तु राजपुरोहितः विद्यापतिः न प्रत्यवर्तत इति राजा आशाहीनः न सञ्जातः। अन्यसभासद्भिः चिन्तितं यत् अभुक्तः विद्यापतिः व्रजन् मृतः उत पशुभिः भुक्तः। विद्यापतिस्तु देशान्तरम् अतिक्रम्य सायं नीलगिरिपर्वतं सम्प्राप्तः। समग्रं दिवसं व्रजन् श्रान्तः क्षुधापीडितः सः अनतिदूरे एकं पर्णकुटीरं दृष्टवान्। कुटीरं प्राप्य तेन तत्र मनोहररूपा, सुपरिच्छदा एका शबरकन्या दृष्टा। श्रान्तः विद्यापतिः तां कन्यां सुमधुरवचनैः स्वपरिचयं ज्ञापितवान्। कन्यया पृष्टेन तेन एतदपि सूचितं यत् सः भगवतः नीलमाधवस्य अन्वेषणाय समागतः। सा कन्यापि स्वपरिचयं प्रकाशयन्ती उक्तवती– अहं शबरराजस्य विश्वावसोः कन्या ललिता अस्मि। मम पिता विश्वावसुः परमवैदूर्यमयस्य परमेश्वरस्य नीलमाधवस्य एकनिष्ठः सेवकः। प्रत्यहं भगवतः नीलमाधवस्य सेवार्चनया मत्पित्रा समग्रा रात्रिः व्यतीयते। भवता सम्यगेव श्रुतं परन्तु भगवतः नीलमाधवस्य दर्शनं साधारणैः अशक्यम्, इतोऽपि भवान् अपरिचितः। अतःपरं गृहं प्रत्यागतः विश्वावसुः ब्राह्मणातिथेः सत्कारार्थं स्वकन्यां नियुक्तवान्। पितृवाक्यानुसारं ललितापि परमयत्नेन, आनन्देन, श्रद्धया च अतिथेः सत्कारं कृतवती। विद्यापतिस्तु स्वमधुरव्यवहारेण क्रमशः शवरराजस्य अनुगतः विश्वासभाजनं सञ्जातः। परन्तु व्यतीतेषु अपि दिवसेषु स्वाभीष्टसिद्ध्यभावात् आसीत् सः विचलितमनाः। भक्तश्रेष्ठाः भगवत्प्राप्त्यर्थं स्वजीवनमपि कदाचिदुपेक्षन्ते। एवं सः बुद्धिमान् विद्यापतिः एकदा शवरराजसमीपे ललितायाः पाणिप्रार्थनां कृतवान्। ततः सम्मते शबरराजे शुभसन्ध्यायाम् एकस्यां तयोः विवाहः सम्पन्नः। ललितापि तस्यां रात्रौ विद्यापतिं नील-माधवस्य साक्षात्कारं कारयिष्यतीति प्रतिश्रुतिं दत्तवती। प्रतिज्ञानुसारेण वस्त्रावृतचक्षुः विद्यापतिः एकस्मिन् दिवसे पत्न्या ललितया साकं भगवतः नील-माधवस्य दर्शनाय प्रस्थितः। विवाहात्परं स्वदेशाचाररूपेण ललिता विद्यापतेः कटिदेशे सर्षपपूर्णं झौलिकमेकं पूर्वमेव स्थापितवती। बुद्धिमता विद्यापतिना तु प्रस्थानात्प्रागेव पत्न्याः अज्ञाते सर्षपझौलिकस्य अधः छिद्रमेकं स्थापितम्। बहुपरिश्रमेण पर्वतमार्गेण गच्छन्तौ तौ एकदा लक्ष्यस्थले उपनीतवन्तौ। तदा ललितया कृतानावृतचक्षुः विद्यापतिः दृष्टवान् पुष्करपलाशकुसुमशय्याशयितः त्रिभुवनपालकः परमकृपासिन्धुः भगवान् नील-कान्तमणिः नीलमाधवः समग्रपर्वतकन्दरमलंकृत्य विराजते। विद्यापतिस्तु भगवद्दर्शनेन आत्मानं कृतार्थजन्म इति मत्वा भगवन्तं सहस्रशः प्रणतिततिं निवेदितवान्। ततः भगवत्साक्षात्कारेण तृप्तमनाः विद्यापतिः पूर्ववत् पत्न्या ललितया साकं गृहं प्रत्यागतवान्। एवम् अभीष्टसिद्धेः अनन्तरं विद्यापतिः पत्नीं ललितामाश्वास्य स्वदेशमुज्जयिनीं प्रस्थितः। राजा इन्द्रद्युम्नस्तु विद्यापतेः सर्वं निशम्य त्वरितमेव तेन साकमुत्कलं निर्गतः। भगवान् नीलमाधवस्तु एतावता शबरराजम् आदिष्टवान् यत्– " अद्यावधिः अहं त्वत्सकाशात् नीलमाधवरूपेण पुजामगृह्णां

परन्तु इतःपरमहं दारुब्रह्मरूपेण समग्रजगज्जनैः पूजितः भविष्यामि” इति। राजा तु विद्यापतिना साकं शबरराजगृहं गतवान्। क्रमशः वर्षर्तोः आगमने पूर्वं गमनसमये विद्यापतेः झौलिकात् पतिताः सर्षपाः कुसुमरूपेण मार्गचिह्नं रचितवन्तः। विद्यापतिः तेनैव मार्गेण लक्ष्यस्थलं प्राप्तवान्। इतःपरं स्वप्नादिष्टः राजा इन्द्रद्युम्नः भगवदादेशानुसारेण मन्दिरं निर्माय दारुब्रह्मणः नीलमाधवस्य प्रतिष्ठां कृतवान्। ततः परमेश्वरस्य नीलकान्तमणेः नीलमाधवस्य दारुब्रह्मरूपेण जगत्यस्मिन् पूजा प्रचलिता। एवं पापप्रभाविते अपि अस्मिन् कलौ परमवैदुर्यमयः परमकृपासिन्धुः नीलकान्तमणिः भगवान् नीलमाधवः स्वभक्तानां स्वदर्शनाकूतानां पतितानामुद्धरणाय दारुब्रह्मरूपेण स्वमायावैचित्र्यमहिम्ना अद्यापि पुरीधाम्नि विराजते।

❀ ❀ ❀